# SANSKRIT

**( Compulsory )**

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

1. अधोलिखितविषयेषु कमप्येकं विषयमधिकृत्य षट्शतशब्देषु (*600* शब्देषु) निबन्धो लेख्यः — 100

*(a)* राजनीतौ महिलानां योगदानम्

*(b)* चीनदेशस्य समुन्नत-अर्थव्यवस्थया किं भारतः भयभीतः?

*(c)* भारतीयसमाजे विवाहविच्छेदस्य स्वीकृतिः वर्धते

*(d)* किं नैतिकता-संवर्धनाय नियमेषु काठिन्यमावश्यकम्?

2. अधोलिखितगद्यांशं सावधानतया पठित्वा तदुपरिष्टाद् दत्तानां प्रश्नानामुत्तरं स्पष्टतया स्वगिरा साधु दीयताम्— 12×5=60

भूमण्डले एकस्थानादन्यस्थानगमनप्रक्रिया प्राचीनकालादेव आसीत्। पुरा जनैः समुदायेन एकक्षेत्रादन्यक्षेत्रगमनं विविधकारणेभ्यः कृतः। कारणानि यथा—पशु-आहारार्थम्, निष्ठुरशासनया यन्त्रणया वा पलायनार्थम्, विचारस्य अथवा अभिव्यक्तिस्वतन्त्रतार्थम्, भ्रमणार्थम्। आप्रवासिनः स्वधनादिवत् स्वसंस्कृतिसंरक्षणमपि कुर्वन्ति। नवीनव्यवस्थार्थम्, संस्कृतिप्रोन्नत्यर्थञ्च प्रयतन्ते। मार्गे समागतान् अन्यजनजातिजनान् सह ते युद्धेन, व्यापारेण, विवाहेन समानुपक्रमेण वा साहचर्यं स्थापयन्ति। प्रारम्भे वाग्युद्धस्य आक्रोशपूर्णा स्थितिः भवति। कालान्तरे शान्तवातावरणं भवति, शान्तिश्चा स्वकीय-कौशलेन परस्परं सौहार्दं जायते। परस्परव्यापारसम्बन्धोऽपि अभिवर्धते।

आधिपत्यं विनैव एक स्वतंत्रवातावरणे प्रत्येकसमूहः बहुमुखीनसमाजरूपेण विकसति। सम्भाव्यते यत् मंगोलियावासिनः अलास्कां गतवन्तः। एंग्लोसेक्सन ब्रिटेनदेशे अनिवसत्। सम्भवतः हजरतमूसाद्वारा चयनितजनैः सह पूर्वनिश्चितभूम्यान्वेषणे नेतृत्वं कृतः स्यात्। सम्भवतः कोलम्बसेन यूरोपीय (पाश्चात्य)-देशे वैश्विकदुस्साहसं प्रति एका महत्त्वपूर्ण भूमिका निर्मिता कृता स्यात्। तदाप्रभृति उपनिवेशवाद अन्यदेशान् विजयितुम् एकं साधनमभवत्। एवं विजितदेशाः विजेतानां प्रभुत्वसाधनमभवत्। अधुना वाणिज्य-व्यापारादीनी प्रमुखरूपेण देशान्तरगमनकारणानि सन्ति। प्रत्येकसमूहः पूर्वजानां मधुरस्मृतिं संगृहीतवान्। कालान्तरे पुरातनसम्बन्धाः क्षीणाः भवन्ति। सम्भवतः अग्रिम-शताब्दौ जनाः स्वकीयपुरातनसंस्कृतिं जीवितुं न पारयन्ति। वयं यत्र निवसामः स एव अस्माकं क्षेत्रं भवति। नवीनस्थानस्य संस्कृत्या संवृतः वयं तद्वदेव भवामः। क्षेत्रीयता वैश्विकतायाम् एकीभूता जायते। आगामिनी काले स्वल्प एव जनाः स्वकीयाम् अस्मितां संरक्षणे सफलाः भविष्यन्ति। नूतनव्यवस्था सार्वभौमिकी एकीभूता च भविष्यति। पुरातनपरम्परा यथा कथञ्चित् मृतप्राय इव जीविता। न कोऽपि जनः, न कापि संस्कृति, न कोऽपि पुरुषो न कापि नारी पृथकतावादे जीविष्यति। केन्द्रीभूताशक्तयः अल्पस्थायिनः भवन्ति। असंख्यजनैः यद्यपि वैयक्तिकसंस्कृतिसंरक्षणार्थं प्रयत्नाः कृताः परन्तु सा बाह्यप्रभावात् पूर्णतया अक्षुण्णा नास्ति। एवं सत्यपि क्षतिग्रस्तभयाद् वयम् अत्यधिकसंवेदनशीला पुरातनपरम्परां प्रति। 'जीन्स', 'डी० एन० ए०', 'आर० एन० ए०' अद्यापि सुगठिता तां संस्कृतिं प्रति। शरीरं मस्तिष्कञ्च अन्यजनानां विचारान् प्रति ग्रहणशीले स्तः। अनभिज्ञता भयं जनयति, भयः घृणां जनयति, घृणा आत्मविश्वासं विनश्यति। एतत् सर्वम् अस्मान् ह्रासोन्मुखं मृत्युमुखं प्रति नयति। अतीतकालीनसंस्कृतयः एवमेव अस्तं गताः। जीवितार्थं दोषसत्वेऽपि परस्परग्रहणशीलता आवश्यकी।

*(a)* नवीनस्थाने निवसन् जनाः प्रथम-साक्षात्कारकाले अन्यैः सह परस्परं कथं संव्यवहरन्ति?

*(b)* पुरा जनानां देशान्तरगमनस्य कारणानि कानि? वर्तमानकालकारणेभ्यः तानि कथं भिन्नानि?

*(c)* कथं परस्परं संस्कृतेरादान-प्रदानं भवति?

*(d)* कथं प्राचीनसंस्कृतयः अस्तं गताः?

*(e)* लेखकः कथं कथयन्ति यत् संस्कृतीनां पृथक्-पृथक्स्थितिः कठिना?

3. अधस्तनगद्यांशस्य संक्षेपः मूलभागस्य तृतीयांश एव लेख्यः। शीर्षकं न प्रदेयः — 60

यदा वयं नियुक्त्यर्थं प्रार्थनापत्रं प्रेषयन्ति तदा स्वकीयान् श्रेष्ठगुणान् अनुभवादीनि च प्रायः प्रकटयामः। बहवः जनाः स्वकीयदोषान् पिधाय केवलं श्रेष्ठोपलब्धयः प्रदर्शयन्ति। नियोक्ता तेषामावेदनपत्राणि विलोक्य चिन्तयतीति सर्वे खलु गुणसम्पन्नाः अनुभवविशारदाश्च। वयं यथासम्भवयोग्यतां प्रदर्शयामः तत्सेवाकार्यार्थम्।

अत्र एका सत्यकथा वर्तते क्रीडाजगति। एक-विश्वविद्यालयीयः कन्दुकक्रीडा-क्रीडकगणः धावनस्यानुभवार्थं धावन्ति स्म। तत्र एकः प्रमुखः Lineman अभवत् तीव्रधावक-निर्णयार्थम्। एकदा सः स्वकीयशिक्षकसमीपं गत्वा तेन सह धावनार्थं निवेदयति। शिक्षकेनानुमतिः प्रदत्ता। सः प्रतिदिनं धावनार्थं गच्छति स्म परन्तु अन्तिमस्थाने एव तिष्ठति स्म। सः प्रतिदिनं निरन्तरं धावति स्म परन्तु प्रतिदिनं सः अन्ते एव अगच्छत्। शिक्षकः आश्चर्यचकितः सन् पृच्छति स्म स्वयं प्रति अयं कन्दुक-क्रीडकः किमर्थं तीव्रधावकेन सह धावनकर्तुमिच्छति यद्यपि सः तीव्रगत्या धावितुं योग्यः परन्तु सदा अन्तिमे आगच्छति। शिक्षकः तं युवकं सूक्ष्मरीत्या अवलोकयति स्म तथा अकथयत् यत् यदि त्वं विजेताभवितुमिच्छसि तदा त्वमन्य-धावकेन सह अधावत्।

शिक्षकः कन्दुकक्रीडा-क्रीडकस्योत्तरं श्रुत्वा आश्चर्यचकितः भवति। तेन युवकेन कथितं यत् अहं पंक्तेर्बहिः न धाविष्यामि, जानाम्यहं यत् करिष्याम्यहम्। अहम् अत्र तीव्रधावनस्य शिक्षाग्रहणाय आगतवान् अस्मि। त्वं जानासि यदहं प्रतिदिनं सूक्ष्मातिसूक्ष्मविधिना उन्नतिं करोमि।

आध्यात्मिक-उन्नत्यर्थम् इदं पर्याप्तमस्ति। अहं सर्वेषु श्रेष्ठतां प्रदर्शयिष्यामि, भाग्याधीनं नास्मि। अस्माकम् उन्नतिः एकं विवृतपुस्तकमस्ति दैवसमक्षम्। सतत-अभ्यासेन अहम् उन्नतिं प्रदर्शयिष्यामि। अहं स्वकीयमसमर्थतां न छिपामि। सः कन्दुक-क्रीडकः अनुभूतवान् यत् प्राचीनसमृद्ध्या न समुन्नतिं करिष्यामि। परिश्रमेण स्वकीयेनैव जनः समुन्नतिं प्राप्स्यति। अतः सः स्वकीयापेक्षया तीव्रधावकैः सह एव धावति। सः पश्यति यत् कथं अन्य-कन्दुक-क्रीडकाः स्वयोग्यतां परिमार्जयन्ति सोऽपि तथैव समाचरन् कठिनपरिश्रमं च कुर्वन् अग्रे तिष्ठति। ईश्वरः सर्वं जानाति, वयं न दोषान् गोपयितुं समर्थः। ईश्वरः निष्कपटप्रयत्नं पश्यति। अस्माकं निष्कपट-कठोरपरिश्रममवलोक्य ईश्वरः साहाय्यं वरप्रदानं च करोति। एवं रीत्य अस्माकं समुन्नतिः सुनिश्चितो भवति।

4. अधःस्थगद्यभागस्य संस्कृतभाषानुवादः कर्तव्यः — 20

Most people involved in the film production industry know that there is a constant evolution. The change is in the way movies are made, discovered, marketed, distributed, shown, and seen. Following independence in 1947, the 1950s and 60s are regarded as the 'Golden Age' of Indian cinema in terms of films, stars, music and lyrics. The genre was loosely defined, the most popular being 'socials', films which addressed the social problems of citizens in the newly developing state. In the mid-1960s, camera technology revolutionized the documentary method by enabling the synchronized recording of image and sound. Today, CINEMA 4D users are free to create scenes without worrying about the size of objects or how many objects are in the scene, shaded settings, texture size, multipass-rendering or eye-catching particle systems.

Until the 1960s, filmmaking companies, many of whom owned studios, dominated the film industry. Artistes and technicians were either their employees or were contracted on a long-term basis. Since the 1960s, however, most performers went the freelance way, resulting in the star system and huge escalations in film production costs. Financing deals in the industry also started becoming murkier

and murkier, since then. According to estimates, the Indian film industry has an annual turnover of ₹ 60 billion. It employs more than 6 million people, most of whom are contract workers as opposed to regular employees. In the late 1990s, it was recognized as an industry.

More money impacted the perception, visual representation, and definitions of reality. Like any other media of mass communication, the themes are relevant to their times.

Thus, filmmaking became more expensive and riskier. As opposed to the time of the Gemini Studio, when only 5 percent of a movie was shot outdoor, filmmakers often select overseas locations in order to create greater realism, manage costs more efficiently or source people and props. Filmmakers spend considerable time scouting for the perfect location.

**5.** अधस्तनगद्यांशस्य आङ्गलभाषयानुवादः करणीयः — 20

जनानां हास-परिहास एको गुणः योग्यता वा। जनाः परस्परं यथा व्यवह्रियन्ते येन मनोरञ्जनं भवति सर्वेषाम्। अत्र जना एवं संवादं परस्परं विधास्यन्ति येन मनुष्याणां हासः मनोविनोदश्च जायते।

आलोचना एका निर्णयात्मिका-रचनात्मिका क्रिया व्याख्यानं वा अस्ति। विधानात्मिकालोचना वार्तालापस्य एका विधिरस्ति यया जनः अन्यस्य व्यवहारस्य संशोधनहेत्वर्थं साधिकारं प्रयत्नं करोति। सामान्यतया कूटनीतिज्ञविधिना अन्यपुरुषस्य या आलोचना क्रियते सा सामाजिकदृष्ट्या न समीचीना। आलोचना रचनात्मिका विरोधप्रदर्शिका हितकारिका शान्तिपूर्ण-संशोधिका पद्धतिरस्ति। 'व्यंग्यः' एकं शस्त्रम् आलोचकानाम्। अस्योपयोगः वाग्वैदग्ध्यप्रदर्शनाय हास्याय च क्रियते। व्यंग्यः न हास्याय अपितु चातुर्यपूर्णसमालोचनाय। समालोचना व्यक्तिरूपेण समूहरूपेण वा सम्भाव्यते। 'व्यंग्यः' बहुमूल्य-साहित्यिकविधिः वर्तते। अस्योपयोगः निश्चितप्रक्रियाद्वारा भवति। अस्य लक्ष्यः व्यक्ति, विचारः, जनसमूहः, शिक्षणसंस्था, सामाजिक-व्यवस्था वा भवति। उपहासो लक्ष्यो न भवितव्यम्। यतः उपहासेन क्रोधो जायते, विरोधो जायते, पूर्णतया अव्यवस्था भवति। हासोपहासरूपः आलोचना सम्यग् न अवगता।

इयमालङ्कारिका-आलोचना अन्येषां मूर्खत्वं विविधरूपेण द्योतयति। दोषान् उद्घाटयति। यदा कदा विकासोऽपि दृश्यते। अस्याः काव्य-नाटकाः मुख्यलक्ष्याः सन्ति परन्तु इयं चित्रकला-राजनीति-चलचित्रादिषु अप्यवलोक्यते। संसारे सभ्यजनानां हास-परिहासो दृश्यते। ते सर्वत्र मूर्खतां पश्यन्ति परन्तु अस्य प्रसारः सभ्यहास्यतां परिहृत्य क्रोधोन्मादकारकः जातः।

**6.** *(a)* अधोलिखितपदानां स्वरचितवाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* अथ

*(ii)* इदानीम्

*(iii)* विना

*(iv)* कुतः

*(v)* तदा

(b) पदसाधनं क्रियताम्— 1×10=10

(i) युष्मद् + तृतीया एकवचनम्

(ii) हरि + सप्तमी एकवचनम्

(iii) गुरु + सप्तमी बहुवचनम्

(iv) राजन् + प्रथमा एकवचनम्

(v) सुहृद् + चतुर्थी एकवचनम्

(vi) भू + लङ्, उत्तमपुरुषे बहुवचनम्

(vii) स्था + लट्, मध्यमपुरुषे द्विवचनम्

(viii) वृतु + लट्, उत्तमपुरुषे बहुवचनम्

(ix) कथ् + लृट्, प्रथमपुरुषे एकवचनम्

(x) अद् + लोट्, प्रथमपुरुषे एकवचनम्

(c) समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

(i) माता च पिता च

(ii) पीतम् अम्बरं यस्य सा

(iii) समुद्र इव गम्भीरः

(iv) हरिणा त्रातः

(v) गङ्गायाः समीपम्

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) माम् अध्ययनं रोचते।

(ii) कर्णेषु बधिरः।

(iii) अहं गम्यते।

(iv) रामस्य वनं गते दशरथः मृतः।

(v) चौरेण बिभेति।

★ ★ ★